## ॥ श्रीबाला मुक्तावळी स्तोत्रम् ॥

**|| śrībālā muktāvaḻī stotram ||**

बालार्ककोटिरुचिरां कोटिब्रह्माण्ड भूषिताम् ।

कन्दर्पकोटिलावण्यां बालां वन्दे शिवप्रियाम् ॥ १ ॥

bālārkakoṭirucirāṁ koṭibrahmāṇḍa bhūṣitām |

kandarpakoṭilāvaṇyāṁ bālāṁ vande śivapriyām || 1 ||

वह्निकोटिप्रभां सूक्ष्मां सच्चिदानन्दविग्रहाम् ।

वरदां रक्तवसनां बालां वन्दे सनातनीम् ॥ २ ॥

vahnikoṭiprabhāṁ sūkṣmāṁ saccidānandavigrahām |

varadāṁ raktavasanāṁ bālāṁ vande sanātanīm || 2 ||

ज्ञानरत्नाकरां भीमां परब्रह्मावतारिणीम् ।

पञ्चप्रेतासनगतां बालां वन्दे गुहाशयां ॥ ३ ॥

jñānaratnākarāṁ bhīmāṁ parabrahmāvatāriṇīm |

pañcapretāsanagatāṁ bālāṁ vande guhāśayāṁ || 3 ||

पराप्रासादमूर्ध्निस्थां पवित्रां पात्रधारिणीम् ।

पशुपाशच्छिदां तीक्ष्णां बालां वन्दे शिवासनाम्॥ ४॥

parāprāsādamūrdhnisthāṁ pavitrāṁ pātradhāriṇīm ।

paśupāśacchidāṁ tīkṣṇāṁ bālāṁ vande śivāsanām ।। 4 ।।

गिरिजां गिरिमध्यस्थां धीरूपां ज्ञानदायिनीम्।

गुह्यतत्त्वपरां चाद्यां बालां वन्दे पुरातनीम्॥ ५॥

girijāṁ girimadhyasthāṁ dhīrūpāṁ jñānadāyinīm ।

guhyatattvaparāṁ cādyāṁ bālāṁ vande purātanīm ।। 5 ।।

रतिकोटिसुसौन्दर्यां चन्द्रकोटिसुशीतलाम्।

आशावासां परां देवीं वन्दे बालां कपर्दिनीम्॥ ६॥

ratikoṭisusaundaryāṁ candrakoṭisuśītalām ।

āśāvāsāṁ parāṁ devīṁ vande bālāṁ kapardinīm ।। 6 ।।

सृष्टिस्थित्यन्तकरिणीं त्रिगुणात्मकरूपिणीम्।

कालग्रसनसामर्थ्यां बालां वन्दे फलप्रदाम्॥ ७॥

sṛṣṭisthityantakariṇīṁ triguṇātmakarūpiṇīm ।

kālagrasanasāmarthyāṁ bālāṁ vande phalapradām ।। 7 ।।

यज्ञनासां यज्ञदेहां यज्ञकर्मशुभप्रदाम् ।

जीवात्मविश्वजननीं बालां वन्दे परात्पराम् ॥ ८ ॥

yajñanāsāṁ yajñadehāṁ yajñakarmaśubhapradām ।

jīvātmaviśvajananīṁ bālāṁ vande parātparām ।। 8 ।।

इत्येतत्परमं गुह्यं नाममुक्तावळिस्तवम् ।

ये पठन्ति महेशानि फलं वक्तुं न शक्यते ॥ ९ ॥

ityetatparamaṁ guhyaṁ nāmamuktāvaḻistavam ।

ye paṭhanti maheśāni phalaṁ vaktuṁ na śakyate ।। 9 ।।

॥ इति शिवम् ॥

।। iti śivam ।।

www.kamakotimandali.com